श्री अष्टलक्ष्मी स्तुतिः

आदिलक्ष्मीः ।
सुमनोवंदितसुंदरि माधवि चंद्रसहोदरि हेममयि
मुनिगणकांक्षितमोक्षप्रदायिनि मंजुलभाषिणि वेदनुते ।
पंकजवासिनि देवसुपूजिते सद्गुणवर्षिणि शांतियुते
जय जय हे मधुसूदनकामिनि आदिलक्ष्मि परिपालय मां ॥

धनलक्ष्मीः ।
अयि कलिकल्मषनाशिनि कामिनि वैदिकरूपिणि वेदमयि
क्षीरसमुद्भवमंगलरूपिणि मंत्रनिवासिनि मंत्रनुते ।
मंगलदायिनि अंबुजवासिनि देवगणाश्रितपादयुगे
जय जय हे मधुसूदनकामिनि धान्यलक्ष्मि परिपालय मां ॥

धैर्यलक्ष्मीः ।
जय वरवर्णिनि वैष्णवि भार्गवि मंत्रस्वरूपिणि मंत्रमयि
सुरगणविनुते अतिशयफलदे ज्ञानविकासिनि शास्त्रनुते ।
भवभयहारिणि पापविमोचिनि साधुसमाश्रितपादयुगे
जय जय हे मधुसूदनकामिनि धैर्यलक्ष्मि परिपालय मां ॥

गजलक्ष्मीः ।
जय जय दुर्गतिनाशिनि कामिनि बहुदे शुभकलहंसगते
रथगजतुरगपदादिसमावृतपरिजनमंडितराजनुते ।
सुरवरधनपतिपद्मजसेविततापनिवारकपादयुगे
जय जय हे मधुसूदनकामिनि गजलक्ष्मि परिपालय मां ॥

संतानलक्ष्मीः ।
अयि खगवाहे मोहिनि चक्रिणि रागविवर्धिनि सन्मतिदे
गुणगणवारिधे लोकहितैषिणि नारदतुंबुरुगाननुते ।
सकलसुरासुरदेवमुनीश्वरभूसुरवंदितपादयुगे
जय जय हे मधुसूदनकामिनि संतानलक्ष्मि परिपालय मां ॥

विजयलक्ष्मीः ।
कमलनिवासिनि सद्गतिदायिनि विज्ञानविकासिनि काममयि
अनुदिनमर्चितकुंकुमभासुरभूषणशोभि सुगात्रयुते ।
सुरमुनिसंस्तुतवैभवराजितदीनजानाश्रितमान्यपदे
जय जय हे मधुसूदनकामिनि विजयलक्ष्मि परिपालय मां ॥

ऐश्वर्यलक्ष्मीः ।
प्रणतसुरेश्वरि भारति भार्गवि शोकविनाशिनि रत्नमयि
मणिगणभूषितकर्णविभूषणकांतिसमावृतहासमुखि ।
नवनिधिदायिनि कलिमलहारिणि कामितवरदे कल्पलते
जय जय हे मधुसूदनकामिनि ऐश्वर्यलक्ष्मि परिपालय मां ॥

धनलक्ष्मीः ।
धिमिधिमिधिंधिमिदुंदुमदुमदुमदुंदुभिनादविनोदरते
बंबंबों बंबंबों प्रणवोच्चारशंखनिनादयुते ।
वेदपुराणस्मृतिगणदर्शितसत्पदसज्जनशुभफलदे
जय जय हे मधुसूदनकामिनि धनलक्ष्मि परिपालय मां ॥

इति श्रीअष्टलक्ष्मीस्तुतिः संपूर्णा ।